"मर्कटी लूता ।" इति तट्टीका ।) स्थावरविषभेदः । इति हेमचन्द्रः ॥ गवेगरूपची । इति त्रिकाण्डशेषः ॥ झाड़गिल् इति भाषा ॥

मर्कटकः, पुं, (मर्कट + स्वार्थे संज्ञायां वा कन् ।) वानरः । लूता । मत्स्यभेदः । इति मेदिनी । के, २०८ ॥ (यथा, विष्णुपुराणे । १ । ६ । २५ ।
"श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः ।
तथा वेणुयवाः प्रोक्तास्तद्वन् मर्कटका मुने ! ॥")
मत्स्यभेदः । दैत्यः । इति शब्दरत्नावली ॥

मर्कटतिन्दुकः, पुं, (मर्कटप्रियस्तिन्दुकः । मध्यपदलोपी कर्म्मधारयः ।) कुपीलुः । इति भावप्रकाशः ॥

मर्कटपिप्पली, स्त्री, (मर्कटस्य पिप्पलीव ।) अपामार्गः । इति राजनिर्घण्टः ॥ (विवरणमस्या अपामार्गशब्दे ज्ञातव्यम् ॥)

मर्कटप्रियः, पुं, (मर्कटस्य प्रियः ।) क्षीरवृक्षः । इति शब्दमाला ॥

मर्कटवासः, पुं, (मर्कटः ऊर्णनाभस्तस्य वासः आवासस्थानम् ।) लूतातन्तुः । माकड़शारजाल इति भाषा ॥ तत्पर्य्यायः । अशावन्धः २ । इति शब्दरत्नावली ॥

मर्कटशीर्षं, क्ली, (मर्कटस्य शीर्षमिव तद्वर्णत्वादेवास्य तथात्वम् ।) हिङ्गुलम् । इति रत्नमाला ॥ (यथा, वैद्यकरत्नमालायाम् ।
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥")

मर्कटास्यं, क्ली, (मर्कटस्य आस्यमिव तद्वर्णत्वादेवास्य तथात्वम् ।) ताम्रम् । इति हेमचन्द्रः । ४ । १०६ ॥ (मर्कटस्यास्यम् ।) वानरमुखम् । (मर्कटस्यास्यमिवास्यं यस्य ।) वानरमुखे, त्रि ॥

मर्कटी, स्त्री, (मर्कति वायुवेगेन इतस्ततो गच्छतीति । मर्क + अटन् । स्त्रियां ङीप् ।) कपिकच्छुः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कपिकच्छुरात्मगुप्ता वृष्या प्रोक्ता च मर्कटी ।
अजरा कण्डुरा चण्डा दुःस्पर्शा प्रावृषायणी ॥
लाङ्गली शूकशिम्बी च सैव प्रोक्ता महर्षिभिः ॥")
अपामार्गः । (यथा,—
"अपामार्गस्तु शिखरी ह्यधःशल्यो मयूरकः ।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
अजमोदा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ३३ । ५ ।
"कुक्कुटीं मर्कटीं शिम्बीमनन्ताञ्चापि धारयेत् ।
मांसमामं तथा पक्वं शोणितञ्च चतुष्पथे ॥")
करञ्जभेदः । इत्यमरः । २ । ४ । ८० ॥ माकड़ा करञ्जा इति भाषा ॥ (यथास्याः पर्य्यायो भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"उदकीर्य्यस्तृतीयोऽन्यः षड्ग्रन्था हस्तिवारुणी ।
मर्कटी वायसी चापि करञ्जी करभञ्जिका ॥"
मर्कट + ङीष् ।) वानरी च ॥

मर्कटेन्दुः, पुं, (मर्कटे खगविशेषे इन्दुरिव ।) काकतिन्दुकवृक्षः । यथा,—
"काकेन्दुः कुलकः काकपीलुकः काकतिन्दुके ।
मर्कटेन्दुः सिन्धुपुष्पो द्वावेतौ तत्र कीर्त्तितौ ॥"
इति शब्दचन्द्रिका ॥

मर्करः, स्त्री, (मर्कति गच्छतीति । मर्क + बाहुलकात् अरः ।) भृङ्गराजः । इति शब्दरत्नावली ॥ (गुणादयोऽस्य भृङ्गराजशब्दे ज्ञातव्याः ॥)

मर्करा, स्त्री, (मर्कर + स्त्रियां टाप् ।) दरी । भाण्डम् । सुरङ्गा । निष्फला स्त्री । इति विश्वः ॥

मर्च, क शब्दे । चौरोऽयं धातुः । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) तालव्यवर्गप्रथमान्तः । मर्चः । इति दुर्गादासः ॥

मर्ज्जूः, स्त्री, (मृज्यते इति । मृज् शुद्धौ + "मृजेर्गुणश्च ।" उणा० १ । ८१ । इति ऊः । गुणश्च ।) शुद्धिः । इति मेदिनी । जे, १३ ॥

मर्ज्जूः, पुं, (मार्ष्टि शोधयति वसनमिति । मृज् + ऊः ।) रजकः । इति हेमचन्द्रः ॥ पीठमर्द्दः । इति शब्दरत्नावली ॥

मर्त्तः, पुं, (म्रियतेऽसौ इति । मृ + "हसिमृग्रिणिति ।" उणा० ३ । ८६ । इति तन् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, मार्कण्डेये । १०० । १८ ।
"पौर्णमास्याममावस्यां पर्व्वस्वन्येषु प्रस्तवः ।
ममैष संश्रुतो मर्त्तैर्भविता पापनाशनः ॥")
मानवकः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (म्रियतेऽत्रेति । भूलोकः । इत्युज्ज्वलदत्तः । ३ । ८६ ॥)

मर्त्त्यः, पुं, (म्रियतेऽत्रेति । मर्त्तो भूलोकस्तत्र भवः । मर्त्त + यत् । यद्वा, मर्त्त एव यदित्यमरटीकायां भरतः ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, ब्रह्मवैवर्त्ते । २ । १ । २६ ।
"गृहे च गृहलक्ष्मीश्च मर्त्त्यानां गृहिणां तथा ।")
मध्यमलोकः । इति जटाधरः ॥ (क्ली, शरीरम् । यथा, भागवते । ३ । ३३ । ३१ ।
"तस्यास्तद्योगविधुतमार्त्त्यं मर्त्त्यमभूत् सरित् ॥")

मर्द्दनं, क्ली, (मृद् + भावे ल्युट् ।) अङ्गमर्द्दनम् । माटिपा इति भाषा ॥ तत्पर्य्यायः । संवाहनम् २ । इत्यमरः ।३।२।२२॥ सम्मलम् ३ । इति शब्दरत्नावली ॥ (यथा, "यत् पुनर्बहिःस्पर्शनाश्रित्याभ्यङ्गस्वेदप्रदेहपरिषेकोन्मर्द्दनाद्यैरामयान् प्रमार्ष्टि तद्बहिः परिमार्ज्जनम् ॥" इति चरके सूत्रस्थाने ११ अध्यायः ॥) अस्य गुणाः । श्रमहरत्वम् । निद्राशुक्रसुखप्रदत्वम् । मांसरक्तत्वक्प्रसन्नकारित्वम् । वायुकफनाशित्वञ्च । इति राजवल्लभः ॥ चूर्णनम् । इति मृदधात्वर्थदर्शनात् ॥ (कदनम् । यथा, भागवते । ३ । ४ । २ ।
"तेषां मैरेयदोषेण विषमीकृतचेतसाम् ।
निम्लोचति रवावासीत् वेणूनामिव मर्द्दनम् ॥"
मृद् + ल्युः । मर्द्दनकारके, त्रि । यथा, महाभारते । १३ । १४ । ३०२ ।
"दक्षं चितिजसङ्घानां मर्द्दनं त्रिदशेश्वरम् ॥")

मर्द्दलः, पुं, (मर्द्दं मर्द्दनं लातीति । ला + कः ।) वाद्यविशेषः । इत्यमरः । १ । ७ । ८ ॥ मादल इति भाषा । तत्पर्य्यायः । मुरः २ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ८ । ४४ । १६ ।
"मृदङ्गानकशङ्खानां मर्द्दलानाञ्च निःस्वनैः ।
खरोष्ट्राश्वतरैश्चैव मत्ता यास्यामहे सुखम् ॥")

मर्द्दितं, त्रि, (मृद् + कर्म्मणि क्तः ।) ग्रन्थितम् । इति विशेष्यनिघ्नवर्गटीकायां भरतः ॥ चूर्णितम् । यथा,—
"तिन्तिडीफलरसेन मर्द्दितो
रामबाण इति विश्रुतो रसः ॥"
इति भावप्रकाशः ॥

मर्ब्ब, गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मर्ब्बति । इति दुर्गादासः ॥

मर्म्म, [न्] क्ली, (मृ + "सर्व्वधातुभ्यो मनिन् ।" उणा० ४ । १४४ । इति मनिन् ।) स्वरूपम् । तत्त्वम् । यथा, नैषधे । २ । ८ ।
"मृगया न विगीयते नृपै-
रपि धर्म्मागममर्म्मपारगैः ।
स्मरसुन्दर ! मां यदत्यज-
स्तव धर्म्मः सदयो दयोज्ज्वलः ॥"
सन्धिस्थानम् । इति लिङ्गादिसंग्रहे अमरभरतौ ॥ जीवस्थानम् । इति राजनिर्घण्टः ॥*॥ अथ मर्म्माणि ।
"सन्निपातः शिरास्नायुसन्धिमांसास्थिसम्भवः ।
मर्म्माणि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः ॥
सप्तोत्तरं शतं सन्ति देहे मर्म्माणि देहिनाम् ।
तान्येकादश मांसे स्युरष्टावस्थिषु सन्ति हि ॥
सन्धीनां विंशतिस्तानि स्नायूनां सप्तविंशतिः ।
चत्वारिंशत्तथैकञ्च शिरामर्म्माणि तत्र तु ॥
द्वाविंशतिः सक्थियुगे तावन्त्येव भुजद्वये ।
द्वादशोरसि कुक्षौ च पृष्ठदेशे चतुर्द्दश ॥
ग्रीवाया ऊर्द्ध्वभागे तु सप्तत्रिंशन्मतानि हि ।
मर्म्माणि तानि सन्ति पञ्चधा भवन्ति ।
तान्याह ।
सद्यःप्राणहराणि स्युर्मर्म्माण्येकोनविंशतिः ।
मर्म्मदेशास्त्रयस्त्रिंशत् स्युः कालान्तरमारकाः ॥
चत्वारिंशच्च चत्वारि वैकल्यं जनयन्ति हि ।
मर्म्माष्टकं रुजाकारि विशल्यघ्नं त्रिकं मतम् ॥
शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठसिरागुदम् ।
हृदयं वस्तिनाभ्यौ च सद्यो घ्नन्ति हतानि चेत् ॥
शृङ्गाटकानि घ्राणश्रोत्राक्षिजिह्वासन्तर्पणानां शिरासुखानां शिरसो मध्ये संयोगस्थानं तानि चत्वारि शिरामर्म्माणि चतुरङ्गुलप्रमाणानि हतानि सन्ति सद्योमारकाणि । अधिपतिः । मस्तकस्याभ्यन्तरे सन्धिशिरयोः सन्निपात उपरिष्टाद्रोमावर्त्तः स एकः सन्धिमर्म्मेदं अर्द्धाङ्गुलप्रमाणं सद्योमारकम् । शङ्खौ भ्रुवोरन्तोपरि कर्णललाटमध्ये तौ द्वे अस्थिमर्म्मणी अर्द्धाङ्गुले सद्योमारके । कण्ठशिराः मातृकाः ग्रीवाया उभयपार्श्वयोश्चतस्रश्चतस्रः शिरास्ता अष्टौ शिरामर्म्माणि चतुरङ्गुलानि सद्योमार-